३९-वायुपुराणोक्त-
गया माहात्म्य-
पत्र-२५. शु.

1343

11" × 5"

श्रीगणेशाय नमः ॥ ॥ सूत उवाच ॥ ॥ शौनकाद्यैर्महाभागैर्वृतर्षिस्सह नारदः ॥ सन
त्कुमारं पप्रच्छ प्रणम्य विधिपूर्वकम् ॥१॥ नारद उवाच ॥ सनत्कुमार मे ब्रूहि तीर्थं
तीर्थोत्तमोत्तमम् तारकं सर्वभूतानां पठतां शृण्वतां तथा ॥२॥ सनत्कुमार उवाच ॥
१ वक्ष्ये तीर्थवरं पुण्यं श्राद्धादौ सर्वतारकम् ॥ गयातीर्थं सर्वदेशतीर्थेभ्योप्यधिकं शृणु ॥ १
३ ॥ गयासुरस्तपस्तेपे ब्रह्मणा क्रतवे स्थितः ॥ प्राप्तस्य तस्य शिरसि शिला धर्मो ह्यधारयत् ॥
४ ॥ तत्र ब्रह्माकरोद्यागं स्थितश्चादिगदाधरः ॥ फल्गुतीर्थादिरूपेण निश्चलार्थमहर्निश
म् ॥५॥ गयासुरस्य विप्रेंद्र ब्रह्माद्यैर्देवतैः सह ॥ कृतयज्ञो ददौ ब्रह्मा ब्राह्मणेभ्यो गृहादिकम् ॥

॥६॥ श्वेतकल्पेतु वाराहे गयो यागमकारयत् ॥ गयनाम्ना गया ख्याता क्षेत्रं ब्रह्मादिकांक्षितम् ॥
॥७॥ कांक्षंति पितरः पुत्रान्नरकाद्भयभीरवः ॥ गयां यास्यति यः पुत्रः स नस्त्राता भविष्य
ति ॥८॥ गयाप्राप्तं सुतं दृष्ट्वा पितॄणामुत्सवो भवेत् ॥ पद्भ्यामपि जलं स्पृष्ट्वा सोस्मभ्यं किन्न
दास्यति ॥९॥ गयां गत्वान्नदाता यः पितरस्तेन पुत्रिणः ॥ पक्षत्रयनिवासी च पुनात्यासप्तमं
कुलम् ॥१०॥ नो चेत्पंचदशाहं वा सप्तरात्रं त्रिरात्रकम् ॥ उषित्वा विधिवच्छ्राद्धं पितॄन्सर्वांस्त्व
तारयेत् ॥११॥ महाकल्पकृतं पापं गयां प्राप्य विनश्यति ॥ पिंडं प्रदद्यात्पित्रादेरात्मनोपि ति
लैर्विना ॥१२॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमम् ॥ पापं तत्संगजं सर्वं गयाश्राद्धा

द्धिनश्यति ॥१३॥ आत्मजोप्यन्यजो वापि गयाभूमौ यदा तदा यन्नाम्ना पातयेत्पिण्डं तन्नयेद्

ब्रह्म शाश्वतम् ॥१४॥ ब्रह्मज्ञानं गयाश्राद्धं गोग्रहे मरणं तथा ॥ वासः पुंसां कुरुक्षेत्रे मुक्तिरे

षा चतुर्विधा ॥१५॥ ब्रह्मज्ञानेन किं साध्यं गोग्रहे मरणेन किम् ॥ वासेन किं कुरुक्षेत्रे यदि पु

२ त्रो गयां व्रजेत् ॥१६॥ गयायां सर्वकालेषु पिण्डं दद्याद्विचक्षणः ॥ अधिमासे जन्मदिने २

चास्तेऽपि गुरुशुक्रयोः ॥१७॥ न त्यक्तव्यं गयाश्राद्धं सिंहस्थेपि बृहस्पतौ ॥ तथा देवप्रमा

देन प्रवहत्सु ब्रणेषु च ॥१८॥ पूतः कर्माधिकारी च श्राद्धकृद्ब्रह्मलोकगामी ह ॥ सकृद्गया

भिगमनं सकृत्पिण्डप्रपातनम् ॥१९॥ दुर्लभं किं पुनर्नित्यमस्मिन्नेव व्यवस्थितिः ॥

प्रमादान्म्रियतेक्षेत्रे ब्रह्मादेर्मुक्तिदायिके ॥२०॥ ब्रह्मज्ञानाद्यथा मुक्तिर्लभ्यते नात्र संश

यः ॥ कीकटादिमृतानां च पितॄणां तारणाय च ॥२१॥ तस्मात्सर्वप्रयत्नेन वस्तव्यं सुविचक्ष

णैः ॥ मुण्डनं चोपवासं च सर्वतीर्थेष्वयं विधिः ॥२२॥ वर्जयित्वा कुरुक्षेत्रं विशालां विर

जां गयाम् ॥ दण्डं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिण्डदः ॥२३॥ दण्डं न्यस्त्वा विष्णुपदे पितृभिः

सह मुच्यते ॥ न दण्डी किल्बिषं चक्ले पुण्यं वा परमार्थतः ॥२४॥ अतः सर्वक्रियां त्यक्त्वा वि

ष्णुं ध्यायति तावुकः ॥ सन्न्यसेत्सर्वकर्म्माणि वेदमेकं न सन्न्यसेत् ॥२५॥ मुण्डपृष्ठाच्च पूर्वस्मि

न्पश्चिमे दक्षिणोत्तरे ॥ सार्द्धक्रोशद्वयं मानं गयेति ब्रह्मणोदितम् ॥२६॥ पंचक्रोशं गयाक्षे

त्वं क्रोशमेकं गयाशिरः ॥ तन्मध्ये सर्वतीर्थानि त्रैलोक्ये यानि संति वै ॥ २७ ॥ श्राद्धकृद्यो गया
क्षेत्रे पितॄणामनृणो हि सः ॥ शिरसि श्राद्धकृद्यस्तु कुलानां शतमुद्धरेत् ॥ २८ ॥ गृहाच्चलित
मात्रेण गयायां गमनं प्रति ॥ स्वर्गारोहणसोपानं पितॄणां च पदे पदे ॥ २९ ॥ पदे पदेऽश्वमेध
३ स्य यत्फलं गच्छतां गयाम् ॥ तत्फलं च न तेऽन्येषां समग्रं नात्र संशयः ॥ ३० ॥ पायसेनाथ च ३
रुणा शक्तुनापृष्टकेन वा ॥ तण्डुलैः फलमूलाद्यैर्गयायां पिण्डपातनम् ॥ ३१ ॥ तिलकल्के
न खण्डेन गुडेन सघृतेन वा ॥ केवलेनैव दध्ना वा ऊर्जेन मधुनाथवा ॥ ३२ ॥ पिण्याकं सघृ
तं खण्डं पितृभ्यो दत्तमित्युत ॥ इष्यते चाल्लिवं नो ज्यं हविष्यान्नं मुनीरितम् ॥ ३३ ॥

एकतः सर्ववस्तूनि रसतृप्तिमधूनि च ॥ स्मृत्वा गदाधरांघ्र्यब्जं फल्गुतीर्थ्यामुपैकृतः ॥ ३४ ॥
नावाहनं नदिग्बंधो न दोषो दृष्टिसंचनः ॥ सकारुण्येयः प्रकर्त्तव्यं तीर्थश्राद्धं विचक्षणैः ॥
३५ ॥ पिण्डासने पिण्डदाने पुनः प्रत्यवनेजनम् ॥ दक्षिणा चान्नसंकल्पः सर्वतीर्थेष्वयं वि
धिः ॥ ३६ ॥ अन्यत्रावाहिता काले पितरो यांत्यमुं प्रति ॥ अत्रागतं सुतं दृष्ट्वा स्वयमायांति स्व
या ॥ ३७ ॥ तीर्थश्राद्धं प्रयच्छद्भिः पुरुषैः फलकांक्षिभिः ॥ कामं क्रोधं तथा लोभं त्यक्त्वा
कार्य्या क्रिया निशम ॥ ब्रह्मचर्य्यैकभोजी च भूशायी सत्यवाक् शुचिः ॥ ३८ ॥ सर्वभूतहिते
रक्तः स तीर्थफलमश्नुते ॥ तीर्थान्यनुसरन् धीरः पाषण्डं पूर्वतस्त्यजेत ॥ ३९ ॥ पाषण्डं

तच्चविज्ञेयं यद्भवेत्कामकारकम् ॥ तीर्थेषु येन राधीशः कर्म्म कुर्वंति तत्कृताः ॥ ४० ॥ यथा ब्रह्मवि
दो वेद्यं वस्तु चानन्यचेतसः ॥ प्रविशंति परे स्थाने ब्रह्म ब्रह्मपरायणाः ॥ ४१ ॥ या तु वैतरणी
नाम नदी त्रैलोक्यविश्रुता ॥ सावतीर्णा गयाक्षेत्रे पितॄणां तारणाय वै ॥ ४२ ॥ स्नातो गोदो वै
४ तरण्यां त्रिसप्तकुलमुद्धरेत् ॥ तथाक्षय्यवटं गत्वा विप्रान्संतोषयिष्यति ॥ ४३ ॥ ब्रह्मप्रकल्पि ४
तान्विप्रान्हव्यकव्यादिनार्च्चयत् ॥ तैस्तुष्टैस्तोषिताः सर्वाः पितृभिः सह देवताः ॥ ४४ ॥ ग
यायां न हि तत्स्थानं यत्र तीर्थं न विद्यते ॥ सांनिध्यं सर्वतीर्थानां गयातीर्थं ततो वरम् ॥ ४५ ॥
मीने मेषे स्थिते सूर्य्ये कन्यायां कार्म्मुके घटे ॥ नारद त्रिषु लोकेषु गयाश्राद्धं सुदुर्ल्लभम् ॥

॥४६॥ मकरे वर्त्तमाने च ग्रहणे चन्द्रसूर्ययोः ॥ दुर्ल्लभं त्रिषु लोकेषु गयायां पिण्डपातन
म् ॥४७॥ गयायां पिण्डदानेन यत्फलं लभते नरः ॥ न तच्छक्यं मया वक्तुं कल्पकोटिशतै
रपि ॥४८॥ ❀ ❀ ❀ ॥ इति श्रीवायुपुराणे श्वेतवाराहकल्पे गयामाहात्म्ये प्रथमोऽध्यायः ॥
॥ नारद उवाच ॥ ❀ ॥ गयासुरः कथं जातः किंप्रभावः किमात्मकः ॥ तपस्तप्तं कथं ते
न कथं देहपवित्रताम् ॥१॥ ❀ ॥ सनत्कुमार उवाच ❀ ॥ विष्णोर्न्नाभ्यम्बुजाज्जातो ब्रह्मा लो
कपितामहः ॥ प्रजाः ससर्ज संयोन्तः पूर्वं देवेन विष्णुना ॥२॥ आसुरेणैव भावेन ह्यसुरा
नसृजत्पुरा ॥ सौमनस्येन भावेन देवान्सुमनसोऽसृजत् ॥३॥ गयासुरोऽसुराणां च महाबल

पराक्रमः ॥ योजनानां सपादं च शतं तस्योच्छ्रयः स्मृतः ॥४॥ स्थूलः षष्टिर्योजनानां श्रेष्ठो
ऽसौ वै समन्ततः स्मृतः ॥ कोलाहले गिरिवरे तपस्तेपे सुदारुणम् ॥५॥ बहुवर्षसहस्राणि निरु
च्छ्वासस्थिरोऽभवत् ॥ तत्तपस्तापिता देवाः संक्षोभं परमं गताः ॥६॥ ब्रह्मलोकं गता देवाः
५ प्रोचुस्तेऽथ पितामहम् ॥ गयासुराद्रक्ष देव ब्रह्मा देवांस्तथाब्रवीत् ॥७॥ व्रजामः शरणं दे ५
वा ब्रह्माद्याः स्वर्गताः शिवम् ॥ कैलाशे चाब्रुवन्नत्वा रक्ष रक्ष महासुरात् ॥८॥ ब्रह्माद्यांस्त्वा
ब्रवीच्छंभुर्व्रजामः शरणं हरिम् ॥ क्षीराब्धौ देवदेवेशः स नः श्रेयो विधास्यति ॥९॥
इत्येवं संमतं कृत्वा गताः क्षीरोदधिं सुराः ॥ ब्रह्मा महेश्वरो देवा विष्णुं नत्वा प्रतुष्टुवुः ॥१०॥

॥ ॥ देवा उचुः ॥ ॥ ॐ नमोस्तु विस्नवे त्रैलोक्ये सर्वेषां प्रभविस्नवे ॥ रोचिस्नवे जिस्नवे चाप्रस
सादिग्रशिस्नवे ॥ ११ ॥ वरिस्नवे गविलस्यास्य योगिनां पारजिस्नवे ॥ वर्हिस्नवे ह्युनंताय न
मोन्नाजिस्नवे नमः ॥ १२ ॥ ॥ सनत्कुमार उवाच ॥ ॥ एवं स्तुतो वासुदेवं सुराणां दर्शनं द
दौ ॥ किमर्थमागता देवा विस्नुनोक्तास्तमब्रवीत ॥ १३ ॥ गयासुरं न याद्देवरक्षास्मानब्रवीद्धरिः ॥
ब्रह्माद्यायान्तु तं दैत्यं चागमिष्याम्यहं ततः ॥ १४ ॥ केशवो गरुडारूढो वरं दातुं गयासुरं ॥ स
वैस्वं स्वं समास्थाय निज वाहनमुत्तमम ॥ १५ ॥ आगत्य विस्नुना सार्द्धं प्राप्ता दैत्यांतिकं ततः ॥
उचुस्तं वासुदेवाद्याः किमर्थं तप्यते त्वया ॥ १६ ॥ संतुष्टास्त्वागता देवाः वरं ब्रूहि गयासुर ॥

॥ गयासुर उवाच ॥ यदि तुष्टाः स्थ मे देवा ब्रह्मविष्णुमहेश्वराः ॥ १७ ॥ सर्वदेवाधिजातीभ्यो

यज्ञतीर्थशिलोच्चयात् ॥ देवेभ्योऽतिपवित्रोऽहमृषिभ्योऽपि शिवाव्ययात् ॥ १८ ॥ मंत्रेभ्यो देव

देवीभ्यो योगीभ्यश्चापि सर्वशः ॥ न्यासिभ्यश्चापि कर्म्मिभ्यो धर्मिभ्यश्च तथा पुनः ॥

६ ॥ १९ ॥ ज्ञातिभ्योऽतिपवित्रोऽहं पवित्रः स्यां सदासुराः ॥ पवित्रो भव तं देवा देत्युक्त्वा दिवं ६

ययुः ॥ २० ॥ दृष्ट्वा दैत्यं ततः स्पृष्ट्वा सर्वे हरिपुरं ययुः ॥ शून्ये लोकत्रये जाते शून्या यमपुरी

ह्यभूत् ॥ २१ ॥ यम इन्द्रादिभिः सार्द्धं ब्रह्मलोकं ततोऽगमत् ॥ ब्रह्माणं मुचिरे देवा गयासुर

विलोपिताः ॥ २२ ॥ तस्माद्लोयोऽधिकारस्तं गृहाण पितामह ॥ ब्रह्माब्रवीत्ततो देवान्व्रजामो

विष्णुमव्ययम्॥२३॥ब्रह्मादयो ब्रुवन्विष्णुं त्वयादत्तो वरोऽसुरः॥तद्दर्शनाद्ययुः स्वर्गं स्म
न्यं लोकत्रयं नूनं॥२४॥देवैरुक्तो वासुदेवो ब्रह्माणं स वचोऽब्रवीत्॥गयासुरं प्रार्थयस्व य
ज्ञार्थं देहि देहकम्॥२५॥विष्णूक्तः ससुरो ब्रह्मा गत्वा पश्यन्महासुरम्॥गयासुरोऽब्रवीद्दृष्ट्वा
ब्रह्माणं त्रिदशैः सह॥२६॥सम्पूज्योत्थाय विधिवत्प्रणतः श्रद्धयान्वितः॥अद्य मे सफलं
जन्म अद्य मे सफलं तपः॥२७॥यदागतोऽतिथिर्ब्रह्मा सर्वं प्राप्तं मयाद्य वै॥योगिन्यो गां गविल्ल
वँल्लोकस्वामिन्पितर्गुरो॥२८॥यदर्थमागतो ब्रह्मंस्तत्कार्यं करवाण्यहम्॥२९॥ब्रह्मोवाच॥
पृथिव्यां यानि तीर्थानि दृष्टानि भ्रमता मया॥३०॥यज्ञार्थं न तु नेतानि पवित्राणि शरी

रतः ॥ त्वयादेहपवित्रत्वं प्राप्तं विष्णुप्रसादतः ॥ ३० ॥ अतः पवित्रं स्वं देहं यज्ञार्थं देहि मेऽसुरः
॥ गयासुर उवाच ॥ धन्योऽहं देवदेवेशाय देहः प्रार्थ्यते त्वया ॥ ३१ ॥ पितृवंशे कृतार्थो हि मा
८ तृवंशे तथैव च ॥ त्वयैवोत्पादितो देहः पवित्रस्तु त्वया कृतः ॥ ३२ ॥ सर्वेषामुपकाराय यागो ८
ऽवश्यं भविष्यति ॥ इत्युक्त्वा सोऽपतद्भूमौ श्वेतकल्पे गयासुरः ॥ ३३ ॥ नैरृतिं दिशमाश्रि
त्य तदा कोलाहले गिरौ ॥ शिरः कृत्वोत्तरे दैत्यः पादौ कृत्वा तु दक्षिणे ॥ ३४ ॥ ब्रह्मा संभृतसं
भारो मानसानृत्विजोऽसृजत् ॥ गौतमं काश्यपं कौत्सं कौशिकं कण्वमेव च ॥ ३५ ॥ भारद्वा
जं ह्यौशनसं वात्स्यं पाराशरं तथा ॥ हरिं कुमारं माराण्डव्यं लौकाक्षिं च तपोधनम् ॥ ३६ ॥

वाशिष्ठं चतथात्रेयं सुदीर्घतपसस्त्विमे॥ यजुर्वेदाध्यायीनश्चाग्निहोत्रादिनिर्युताः॥
३७॥ चतुर्दशैतान्विप्रेन्द्रान्वेधाल्लोकपितामहः॥ परिकल्प्याकरोद्यागे गयासुरशरीर
के॥ ३८॥ हिजैरेतु मनो ब्रह्मा पश्चाग्निमसृजत्पुरा॥ दक्षिणाग्निं गार्हपत्यमावाहनीयं
तपोमयम्॥ ३९॥ सत्यावसथ्योदेवर्षे येषु यज्ञाः प्रतिष्ठिताः॥ यज्ञस्य च प्रतिष्ठार्थं वि
प्रेभ्यो दक्षिणां ददौ॥ ४०॥ हुत्वा पूर्णाहुतिं ब्रह्मा स्नात्वा चावभृथे पुरा॥ यज्ञयूपं सुरैः सा
र्द्धं समानीय व्यरोपयत्॥ ४१॥ निर्मिते शरसां श्रेष्ठे शरस्ये वोच्छ्रितं शुभम्॥ मत्वा गया
सुरो यज्ञं पूर्णामुत्थाय मैच्छत॥ ४२॥ चलितश्चकितो ब्रह्मा धर्म्मराजमयाचत॥ यास्त

८

गृहे तत्र शिलां समानीयात्र धारय ॥ ४३ ॥ दैत्यस्य शिरसो शीघ्रं तां धारय ममाज्ञया ॥ निश्चला
स्थिय मः श्रुत्वा धारयन्मस्तके शिलाम् ॥ ४४ ॥ शिलायां धारितायां तु सशिलश्चासुरो चलत् ॥
देवान्नचेयरुद्रादीन्शिलायां निश्चला किल ॥ ४५ ॥ तिष्ठं तु देवाः सकला देव्यश्च मुनयः
स्थिताः ॥ देवा पादैर्ल्लिख्यात तथापि चलितोऽसुरः ॥ ४६ ॥ ब्रह्माथ व्याकुलो विष्णुं ग
तः क्षीराब्धिशायिनम ॥ तुष्टुव प्रणतो भूत्वा नत्वा चात्याहृतः प्रभुम् ॥ ४७ ॥ ब्रह्मो
वाच ॥ ब्रह्माण्डस्य पते नाथ नमामि जगतां पतिम् ॥ गतिं कीर्त्तिमतां नृणां भुक्ति
मुक्तिप्रदायकम् ॥ ४८ ॥ विष्वक्सेनो ब्रवीद्विष्णुं देवलां स्तौमि पद्मज ॥ हरिराह न

८

यमलं विसृज्य त्वं मानयत ॥४९॥ ब्रजमूचे हरिः कस्मादागतोसि वदस्व तम ॥ ०॥ ब्रह्मोवाच ॥ ०॥ देवदेव कृते यागे प्रचचाल गयासुरः ॥५०॥ शिलायां देवरूपिण्यां न्यस्तायां तस्य मस्तके ॥ रुद्रादीषु च देवेषु संस्थितेष्वसुरो चलत ॥५१॥ इदानीं निश्चलार्थं हि प्रसादं कुरु माधव ॥ ब्रह्मणो वचनं श्रुत्वा ह्याकृष्य स्वशरीरतः ॥५२॥ मूर्तिं ददौ निश्चलार्थं ब्रह्मणे तु गदाधरः ॥ आनीय मूर्तिं ब्रह्मापि शिलायां समधारयत ॥५३॥ न यापि चलितं विष्णुर्न देवेर्मिहाद्वयत ॥ आगत्य विष्णुः सीरव्येः शिलायां संस्थितो भवत ॥५४॥ जनार्दनान्ति धानेन पुण्डरीकाक्ष नामतः ॥ शिलायां निश्चलार्थं हि स्वयमादिगदाधरः ॥५५॥ निश्चला

र्थं पंच धासी च्छिलायां प्रपितामहः ॥ पितामहोऽथ फल्गवीशः केदारः कनकेश्वरः ॥५६॥
ब्रह्मा स्थितः स्वयं तत्र गजरूपी विनायकः ॥ गयादित्यस्तथोत्तरार्को दक्षिणार्कस्त्रिवार
विः ॥५७॥ लक्ष्मीः सीता सन्निधानेन गौरी च मंगलाह्वया ॥ गायत्री चैव सावित्री त्रिसंध्या
ए च सरस्वती ॥५८॥ इंद्रो बृहस्पतिः पूषा वसवोऽष्टौ महाबलाः ॥ विश्वेदेवास्तथाश्विनेयौ म ए
रुतो विघ्ननायकः ॥५९॥ सयक्षोरगगंधर्वास्तस्थुर्देवाः स्वशक्तिभिः ॥ आद्ययागदया
चासौ यस्माद्दैत्यः स्थिरीकृतः ॥६०॥ स्थित इत्येव हरिणा तस्मादादिगदाधरः ॥ ऊचे
गयासुरो देवान् किमर्थं वंचितो ह्यहम् ॥६१॥ यज्ञार्थं ब्रह्मणो दत्तं शरीरं मम सत्यं मया ॥

विष्णोर्वचनमात्रेणाकिंतयानिश्चलोह्यहम् ॥९२॥ यत्सुरैः पीडितोऽत्यर्थं गदया हरिणा तथा
पीड्यश्चयद्यहं देवाः प्रसन्नाः संतु सर्वदा ॥९३॥ गदाधरादयस्तुष्टाः प्रोचुः सादिगदाधराः ॥
वरं ब्रूहि प्रसन्नास्मो देवान्नूचे गयासुरः ॥९४॥ यावत्पृथ्वीपर्वताश्च यावच्चंद्रार्कतारकाः
तावच्छिलायां तिष्ठंतु ब्रह्मविष्णुमहेश्वराः ॥९५॥ अन्ये च सकला देवा मन्नाम्ना क्षेत्रमस्तु वै
पंचक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ॥९६॥ तन्मध्ये सर्वतीर्थानि प्रयच्छंतु हितं नृणा
म ॥ स्नानादितर्पणं कृत्वा पिंडदानात्फलाधिकम् ॥९७॥ सहात्मनाः सहस्रं च कुलाना
मुद्धरेन्नरः ॥ व्यक्ताव्यक्तस्वरूपेण यूयं तिष्ठत सर्वदा ॥९८॥ गदाधरः स्वयं लोकान्पू

यातसर्वाघनाशनः॥ श्राद्धं सपिण्डकं येषां ब्रह्मलोकं प्रयांतु ते॥७९॥ ब्रह्महत्यादिकं पापं न
श्यत्वेतत्प्रश्नोविनाम्॥ नैमिषं पुष्करं गंगां प्रयागं च विमुक्तिदम्॥८०॥ एतान्यन्यानि तीर्था
णि दिवि भुव्यंतरिक्षतः॥ समायांतु सदा नॄणां प्रयच्छंतु हितं सुराः॥८१॥ किं बहूक्तया सुरे
१० शाणां पुण्यासे कापि देवता॥ चेन्नतिष्ठेदहं चापि समयः परिपाल्यताम्॥८२॥ तयासुर १०
वचः श्रुत्वा श्रोतुर्विस्वादयः सुराः॥ तथायत प्रार्थितं सर्वं तद्भविष्यत्यसंशयम्॥८३॥ पि
तॄणां कुलसाहस्रमात्मानेपिण्डदानतः॥ श्राद्धादिनानयिष्यंति ब्रह्मलोकमनामयम्
॥८४॥ ॥ विष्णुरुवाच॥ ॥ अस्मत्पादानर्चयित्वा यास्यंति परमां गतिम्॥ देवैर्ईत्वरो दे

त्यो हर्षितो निश्चलोऽभवत् ॥७५॥ ॥ इति श्रीवायुपुराणे श्वेतवाराहकल्पे गया
माहात्म्ये द्वितीयोध्यायः ॥२॥ श्रीनारद उवाच ॥ कथं शिला समुत्पन्ना यया क्रांतो गयासुरः ॥ किं रूपं किं च
माहात्म्यं तस्याः किं वद नाम च ॥१॥ सनत्कुमार उवाच ॥ आसीद्धर्म्मो महातेजाः सर्व
विज्ञानपारगः ॥ विश्वरूपा च तत्पत्नी च धर्म्मव्रतपरायणा ॥२॥ तस्यां धर्म्मात्समुत्पन्ना क
न्या धर्म्मव्रता सती ॥ सर्वलक्षणसंपन्ना लक्ष्मीरिव गुणाधिका ॥३॥ तस्यां ये च गुणा ह्यासं
स्ते तिष्ठंति जगत्त्रये ॥ धर्म्मो धर्म्मव्रतायास्तु त्रिषु लोकेषु मार्गयन् ॥४॥ नानुरूपं वरं लेभे
धर्म्मो न्क्का वरसिद्धये ॥ तपः कुरुव वरार्थं त्वं तथेत्युक्त्वा वनं ययौ ॥५॥ कन्या सा च तपस्ते

पेसर्वेषांदुष्करंचयत् ॥ वासुब्रह्मा श्वेतकल्पेतु वर्षाणामयुगंपुरा ॥६॥ ब्रह्मणोमानसःपु
त्रोमरीचिर्न्नामविश्रुतः ॥ पर्य्यटन्पृथिवींसर्वांकन्यारत्नंददर्शह ॥७॥ रूपयौवनसंपन्नां
परमंतपसिस्थिताम् ॥ पप्रच्छाथमरीचिस्तांकात्वंकस्यासितद्वद ॥८॥ रूपेणानेनमांची
११ रेविमोहयशिशुभव्रते ॥ ब्रह्मात्मजोहंविख्यातोमरीचिर्वेदपारगः ॥९॥ मरीचेर्वचनंश्रुत्वा ११
कन्याप्रोवाचतंमुनिम् ॥ अहंधर्मव्रतानाम धर्मपुत्रीतपोन्विता ॥१०॥ पतिव्रतार्थंविप्रेंद्र
चरामिपरमंतपः ॥ धर्मव्रतांमरीचिस्तामुवाचप्रीतिपूर्वकम् ॥११॥ पतिव्रतादर्शनान्मेन
विद्यासिशुभव्रते ॥ पतिव्रतेच्छयापृथ्वींविचरामिह्यहर्न्निशम् ॥१२॥ लेचपतिव्रताजा

तांच्चजेत्वांच्चजमांवरे॥ लोकेनतादृशीकन्याममतुल्योनतेवरः॥१३॥ धर्म्मव्रतेधर्म्मपुत्री
तस्मात्वंच्चजमेऽधुना॥ धर्म्मव्रतामुनीप्राह धर्म्मयाच्चयमुव्रत॥१४॥ मांदास्यतिसचेत्तुत्त्यं
मेव्रायाम्युद्यतास्मिते॥ तच्छ्रुत्वाधर्म्ममगमन्मुनीधर्म्मदर्शनः॥१५॥ तेजःपुंजवरंनत्वाह्यास
नार्घ्यादिनार्च्चयेत॥ किमर्थमागतःपृष्टोमरीचिर्द्धर्म्ममव्रवीत॥१६॥ कन्यार्थीच्चमता
इष्टवीदृष्टातेकन्यकावरा॥ मह्यंकन्यांतुतांदेहिश्रेयस्तव्रच्चविष्यति॥१७॥ मुनेर्वचनमा
कर्ण्यधर्म्मस्तेतस्यचिंतयत॥ वरंकुलंधनंदृष्ट्वापित्राकन्याप्रदीयते॥१८॥ वरोऽस्तवव्रय
ंक्रांताव्रह्मणोमानसःसुतः॥ व्राह्मणानांधनंविद्यातपश्चास्मिन्प्रवर्त्तते॥१९॥ विद्या

प्येयोग्यतार्म्मिद्स्य धर्म्मः प्रोचे तथेतितम् ॥ धर्म्मव्रतां समानीय दत्तवांस्तां मरीचये ॥ २० ॥
मरीचिः प्राह हे धर्म्म इह सौख्यं सदास्तु ते ॥ ततो विवाह्य तां शिष्यैः पद्ममानैः सुशोभितम् ॥
॥ २१ ॥ स्वाग्निहोत्रेण सहितां स्वाश्रमं तां द्विजोनयत् ॥ रेमे मुनिस्तया सार्द्धं यथा विष्णुः श्रि
१२ यासह ॥ २२ ॥ पार्वत्या च यथा शंभुः सरस्वत्या यथा ह्यजः ॥ यज्ञे पुत्रशतं तस्यां मरीचिर्विष्णु १२
नोपमम् ॥ २३ ॥ मरीचिः फलपुष्पार्थं वनं गत्वा समागतः ॥ श्रांतं कदाचित्तां पत्नीमुवाचे
तिपतिव्रताम् ॥ २४ ॥ नुन्नवातु शयनस्थस्य पादसंवाहनं कुरु ॥ धर्म्मव्रता तथेत्युक्त्वा शय
नस्थस्य सा मुनेः ॥ २५ ॥ पादसंवाहनं चक्रे घृतेनाभ्यज्य तत्परा ॥ निद्रायमाने च मुनौ

ब्रह्मातं देशमागतः ॥२६॥ इयेषदृष्ट्वा ब्रह्माणं मनसा त्वयि तु प्रजनुम ॥ पादसंवाहनं कुर्यामहं
किं पूज्योयं जगद्गुरुः ॥२७॥ इत्याकृत्वा समुत्तस्थौ मत्वा सा च गुरोर्गृहम ॥ अर्घ्यपाद्यादि
कं दत्वा ब्रह्माणं समपूजयत ॥२८॥ स तत्कृतायां तु शय्यायां विश्राममकरोद्द्विजः ॥ एतस्मि
न्नंतरे भर्ता समुत्तस्थौ स्वतल्पतः ॥२९॥ धर्मव्रतामपश्यत स विप्रक्रुद्धः शशापह ॥
पादसंवाहनं त्यक्त्वा यस्मादाज्ञां विहाय मे ॥३०॥ गतान्यत्र ततः पापाच्छापदग्धा शिला
नर ॥ भर्ता धर्मव्रता शप्ता मरीचिं प्राह कोपिता ॥३१॥ शयाने त्वयि शं प्राप्ते ब्रह्मा त्वज्ज
नको गुरुः ॥ त्वया त्याज्यो हि कर्तव्यं स्वगुरोः पूजनं सदा ॥३२॥ मयात्तु धर्मचारिण्या तत्र

कार्य्येह्नतेमुने॥ स्वदोषाहं यतः शप्तातस्माच्छापं ददामिते॥३३॥ त्वंच शापं महादेवाद्दुर्लिः
प्राप्स्यस्यसंशयम्॥ व्याकुलंतं पतिं दृष्ट्वा व्याकुलागात प्रजापतिम्॥३४॥ नत्वा शया
नं ब्रह्माणमग्निं प्रज्वाल्य चैंधनैः॥ गार्हपत्येस्थिताचक्रेतपः परममद्भुतम्॥३५॥
१२ पतिव्रतायास्तपसा सर्वेषांचच्चयंस्नम्॥ इंद्रादयस्तु संतप्ता आगतास्ते शरणं हरिम्॥३६॥ १३
ऊचुः क्षीराम्बुधौ सुप्तं संतप्तास्तपसा हरे॥ पतिव्रतायास्तपसात्रैलोक्यं रक्ष केशव॥३७॥
इंद्रादीनां वचः श्रुत्वा विष्णु धर्म्मव्रतां ययौ॥ एतस्मिन्नेव काले तु प्रबुद्धो ब्रह्मणात्मजः॥
॥३८॥ उवाच धर्म्मव्रतां देवाश्चाग्निस्थां सह केशवाः॥ अग्निमध्ये तपः कर्त्तुं कस्य शक्तिः

पतिव्रते॥३९॥त्वयाहमं यत परमं सर्व्वलोकचत्रयेंकरम॥वरं वरय धर्म्मज्ञे त्वस्मत्तो यदभीप्सि
तम॥४०॥विसष्ठादीनां वचः श्रुत्वा देवान्धर्म्मव्रताब्रवीत॥दत्तो मरीचिना शापो मह्यं स ह्यय ग
च्छतु॥४१॥धर्म्मव्रता वचः श्रुत्वा प्रोचुरेतां सुराः पुनः॥धर्म्मव्रते धर्म्मपुत्रि शापोयं परमर्षिणा॥
॥४२॥दत्तः सननिराकर्त्तुं शक्यो देवद्विजातिभिः॥तस्मादन्यं वरं ब्रूहि यतो धर्म्मस्य संस्थितिः॥
॥४३॥न्नवेदैस्त्रिषु लोकेषु वेदोक्तस्य सुचव्रते॥चर्तुः शापं मोचयितुं न शक्नुथ यदामराः॥४४॥
मह्यं वरं प्रयच्छध्वमेवं विधमनुत्तमम॥शिलाहं हि भविष्यामि त्रैलोक्ये पावनी वरा॥४५॥
नदीनदसरस्तीर्थं देवादिभ्यो गतिपावनी॥ऋष्यादिभ्यो मुनिभ्यश्च मुख्यदेवेभ्य एव

च ॥४६॥ त्रैलोक्ये यानि लिंगानि व्यक्ताव्यक्तात्मकान्यपि ॥ तानि तिष्ठंतु मद्देहे तीर्थरूपेण
सर्वदा ॥४७॥ तीर्थान्यपि च सर्वाणि नक्षत्रप्रमुखास्तथा ॥ तिष्ठंतु देवाः सकला देव्यश्च मुन
यस्तथा ॥४८॥ शिलास्थितेषु सर्वेषु स्नानं कृत्वा यतर्प्पणम् ॥ श्राद्धं सपिण्डकं येषां ब्रह्म
१४ लोकं प्रयांति ते ॥४९॥ गदाधरोदृश्यतीर्थं सर्वतीर्थोत्तमोत्तमम् ॥ मुक्तिक्षेत्रेति पितॄणां क १४
र्तॄणां श्राद्धतः सदा ॥५०॥ ❀ ❀ ❀ ॥ इति श्रीवायुपुराणे श्वेतवाराहकल्पे गयामा
हात्म्ये तृतीयोऽध्यायः ॥ सनत्कुमार उवाच ॥ वक्ष्ये शिलाया माहात्म्यं शृणु नारद मुक्तिद
म् ॥ यस्या गायंति देवाश्च माहात्म्यं मुनिपुंगवाः ॥१॥ शिलास्थिता पृथिव्यां सा देवरूपाणि

पावनी॥ विचित्राख्यं शिलातीर्थं त्रिषु लोकेषु विश्रुतम्॥ ३॥ तस्याः संस्पर्शनाल्लोकाः सर्वे ह
रिपुरं ययुः॥ शून्ये लोकत्रये जाते शून्यायमपुरीह्यभूत्॥ यमइंद्रादिभिः सार्द्धं उचे ब्रह्माणमं
द्भुतम्॥ अधिकारं गृहाणाथ यमदंडं पितामहः॥ ४॥ यममूचे ततो ब्रह्मा स्वगृहे धारयस्व ताम्॥
ब्रह्मोक्तो धर्मराजस्तु गृहे तां समधारयत्॥ ५॥ यमो धिकारं स्वं चक्रे पापिनां शासनादिकम्॥
एवं विधा गुरुतरा शिला जगति विश्रुता॥ ६॥ यया ब्रह्मा यया विष्णुर्यया देवो महेश्वरः॥ ब्र
ह्माण्डं च यया मेरुस्त्वयेयं देवरूपिणी॥ ७॥ जयासुरस्य शिरसि गुरुत्वाद्धारिता यतः॥ अतः पवि
त्रया योगैः पितॄणां मोक्षदायकः॥ ८॥ पवित्रया हि त्रयो योगे हयमेधमजोकरोत्॥ नागार्थ

मागतानदृष्ट्वाविस्मितानब्रवीच्छिला ॥ ८ ॥ शिलास्थितेप्रतिज्ञांतांकुर्वंतुपितृमुक्तये ॥ त
थेत्युक्त्वाशिलायांतेदेवाविष्ण्वादयःस्थिताः ॥ १० ॥ शिलारूपेणामूर्त्तोश्चपदरूपेणदेवताः ॥
मूर्त्तामूर्त्तस्वरूपेणस्थितांपूर्वप्रतिज्ञया ॥ ११ ॥ दैत्यस्यमुण्डपृष्ठेतुयस्मात्सासंस्थिताशि
१५ ला ॥ तस्मात्समुण्डपृष्ठाद्रिःपितॄणांब्रह्मलोकदः ॥ १२ ॥ आच्छादितःशिलापादप्रभासे १५
नाद्रिणायतः ॥ प्रभासितोभास्करेणेतिप्रभासेशःप्रकीर्त्तितः ॥ १३ ॥ शिलांगुष्ठैकदेशोयः
साचप्रेतशिलास्मृता ॥ पिण्डदानायेतःतस्यांप्रेतत्वान्मोचयेत्पितॄन् ॥ १४ ॥ महानदीप्र
भासोद्योःसंगमेस्नानकृन्नरः ॥ रामोदेव्यासहस्नातोरामतीर्थंततःस्मृतम् ॥ १५ ॥ श्राद्धि

तो धमहानद्यां रामः स्नातो ऽजरेद्यदि ॥ रामतीर्थं ततोन्मूत्वा त्रिषु लोकेषु विश्रुतम् ॥१७॥
जन्मांतरशतं साग्रं यत्कृतं दुःकृतं मया ॥ तत्सर्वं विलयं यातु रामतीर्थाभिषेचनात् ॥१८॥
मंत्रेणानेन यः स्नात्वा श्राद्धं कुर्वीत मानवः ॥ रामतीर्थे पिण्डदस्तु विष्णुलोकं व्रयात्य
सो ॥१९॥ तथैवतु नत्वा स्थितो रामः सीतया च रताश्रमे ॥ राम राम महाबाहो देवानामभ-
यंकर ॥२०॥ त्वां नमस्ये ह देवेश मम नश्यतु पातकम् ॥ मंत्रेणानेन यो नत्वा श्राद्धं कुर्यात्स
पिण्डकम् ॥२१॥ प्रेतत्वात्तस्य पितरो विमुक्ता यांति पितृताम् ॥ आपस्त्वमसि देवेश ज्यो-
तिषां पतिरेव च ॥२२॥ पापं नाशय मे देव मनोवाक्कायकर्मजम् ॥ नमस्कृत्य प्रभासे शं

त्रासमानेगिरिंव्रजेत्॥२३॥तंचशंभुंनमस्कृत्यकुर्य्याद्याम्प्रवलिंततः॥रामेवनंगतेशैल
मागत्यचरतस्थितः॥२४॥पितृपिंडादिकंकृत्वारामेसंस्थाप्यतत्रच॥रामंसीतांलक्ष्म
णंचमुनीन्स्थापितवान्प्रभुः॥२५॥भरतस्याश्रमेपुण्यंनित्यंपुण्यतमैर्वृतम्॥मतं
१६ गस्यपदेतत्रदृश्यतेसर्वमानुषैः॥२६॥स्थापितंधर्म्मसर्वस्वंलोकस्यास्यनिदर्शना १६
त्॥मतंगस्यपदेस्नाद्वीसर्वानस्तारयतेपितॄन्॥२७॥रामतीर्थेनरःस्नात्वारामंसीतां
समर्च्यच॥रामेश्वरंप्रणम्याथनदेहीजायतेपुनः॥२८॥शिलायाराजघनंचूडःसमा
क्रांतंनगेनच॥धर्म्मराजेनसंप्रोक्तोनगच्छेतिनगःकिल॥२९॥यमराजधर्म्मराजौ

निस्त्वलार्थं व्यवस्थितौ॥ताभ्यां वलिं प्रयच्छामि पितृणां मुक्तिहेतवे॥३०॥द्वौ श्वानौ श्याव
सवलौ वैवस्वतकुलोद्भवौ॥ताभ्यां वलिं प्रयच्छामि स्यातामेतावहिंसकौ॥३१॥ऐंद्रवारु
णवायव्यायाम्या वैनैर्ऋतास्तथा॥वायसाः प्रतिगृह्णन्तु भूमावन्नं मयार्पितम्॥
३२॥शिलायां दक्षिणे हस्ते स्थापितः कुण्डपर्वतः॥तिमिरादित्यईशानो न्नागीएगे महे
श्वराः॥३३॥वह्नी द्वौ वरुणो रुद्रा श्वसाराः पितृमोसदा॥त्वरताश्रममासाद्य तानन्नमे
तपूजयेत्ततः॥३४॥पापेभ्यः स्वापपापेभ्यो मुच्यते पितृभिः सह॥यत्र कुत्रापि देवर्षे
त्वरतस्याश्रमे नरः॥३५॥स्नातः श्राद्धादिकं कुर्यात्तत्र कल्पे न हीयते॥गयायां चा

स्वयंश्राद्धंजपहोमतपांसिच ॥३६॥ सर्वमानंत्यमाप्नुवैयद्दत्तंचरताश्रमे ॥ चतुर्युगस्वरूपेण
चतस्रोरविमूर्त्तयः ॥३७॥ दृष्टांस्पृष्टाःपूजितास्ताःपितॄणांमोक्षदायिकाः ॥ मुक्तिवाम
नइत्येवतारकाख्योविधिःपरः ॥३८॥ संसारार्णवमग्नानांनावावेतौशुरेश्वरौ ॥ तारकंब्रह्म
१७ विम्बेषांमृतानांजीवतामिदम् ॥३९॥ त्रिविक्रमंचब्रह्माणांयःपश्येत्सुरुषोत्तमम् ॥ पि १७
तृभिःसहधर्म्मात्मासयातिपरमांगतिम् ॥४०॥ शिलायावामहस्तेपितथाह्युद्यंतकोगि
रिः ॥ स्थापितःपिताडदस्तत्रपितॄन्ब्रह्मपुरंनयेत् ॥४१॥ नैमिषारण्यपार्श्वेतुईज्येब्रह्मा
सुरैःसह ॥ मुख्यसंज्ञंहितत्तीर्थंदेवास्तत्रपदेस्थिताः ॥४२॥ तेषुतेषुपदेषेवतीर्थेषुमुनि

सत्तम॥यत्किंचिदशुभ्नंकर्म्मतत्सर्व्वंनश्यतिनारद॥४३॥तन्नैमिषवनंपुण्यंसेवितं
पुण्यपूर्हषैः॥तत्रव्यासःशुकःपैलःकणादोवेधाशिवोहरिः॥४४॥तेषांदर्शनमात्रेणमुच्य
तेपातकैर्न्नरः॥वामहस्तेशिलायाश्चतयाह्युधृतकोगिरिः॥४५॥सपर्वतःसमानीतोह्य
गस्त्येनमहात्मना॥तत्रब्रह्माहरश्चैवतपस्तप्त्वाग्रंहिचक्रतुः॥४६॥तत्रागस्त्यस्यहिवरं
कुण्डंत्रैलोक्यदुर्ल्लभम॥यत्रमुन्यष्टकंसिद्धंतपस्तप्त्वाशिवंगतम॥४७॥कुण्डेमुन्य
ष्टकंनत्वापितॄन्वुलपरंनयेत॥अगस्त्येनाथदेवर्षेपुरस्याद्धर्म्महात्मना॥४८॥शि
लायांवामहस्तेपिस्थापितोगिरिराट्शुभः॥वादित्राद्यैर्दिव्यगीतैर्गन्धर्वावादित्रकौ

गिरिः ॥४९॥ तत्रविद्याधरानामगंधर्वाप्सरसांगणाः ॥ समेताह्यापिदिव्यानिगीतानिस
हगायंति ॥५०॥ मोहनोयमुनीयश्च शैलूषोमोहनोत्तमः ॥ पर्वतोनारदोध्यानीसंगीति
पुष्पदंतकः ॥५१॥ हाहाहूहूयत्रतत्रयो गीतनादंप्रचक्रिरे ॥ तथाचित्ररथोनामसर्वगं
१८ धर्वसंवृतः ॥५२॥ गायंतिमधुराण्येवगीतान्यद्रौमहोत्सवम् ॥ अतःसपर्वतोदेवैःसे १८
व्यतेह्यापिनित्यशः ॥५३॥ धर्मोजास्तत्रदेवेशोहरोचतस्रांगनागणान् ॥ पार्वत्यासहितो
हृष्टःपर्वतेगीतनादिते ॥५४॥ मोदतेपूजितोध्यातःपितॄणांपरमांगतिं ॥ गयायांपर
मात्माहिगोपतिर्वागदाधरः ॥५५॥ दृश्यतेवैष्णवीमायातथारुद्राचवियामुने ॥

शिलायां दक्षिणे हस्ते त्वमस्मकूटो गिरिः स्मृतः ॥५८॥ धर्म्मराजेन तत्रास्ते ह्यगस्त्यः सहभा
र्य्यया ॥ अगस्त्यस्य पदे दिव्ये पिण्डदो ब्रह्मलोककृत् ॥५९॥ पितृभिः सह धर्मात्मा पूज्य
मानो दिवौकसैः ॥ अगस्त्योऽन्तर्गतांस्तत्र तपश्चोग्रं चचार ह ॥६०॥ ब्रह्मणस्तु वरं लेभे माहा
त्म्यं तु विदुर्ल्लभम् ॥ लोपामुद्रा तथा भार्य्या पितॄणां परमां गतिं ॥६१॥ तत्रागस्त्ये
श्वरं दृष्ट्वा मुच्यते ब्रह्महत्यया ॥ अगस्त्यं च सभार्य्यं च पितॄन् ब्रह्मपुरं नयेत् ॥६२॥ कुशिकनाथ
स्तपस्तेपे सीताद्रूद्दक्षिणे गिरौ ॥ वटो वटेश्वरस्तत्र स्थितः प्रपितामहः ॥६३॥ तदग्रे रुक्मिणी
कुण्डं पश्चिमे कपिलानदी ॥ कपिलेशं नदीतीरे अमासोमसमागमे ॥६४॥ कपिलायां नरः

स्नात्वा कपिलेशं समर्च्यैच ॥ कृते श्राद्धे पिण्डदानैः पितरो मोक्षमाप्नुयुः ॥ ९३ ॥ तत्राग्निधारा
गिरिवराद् आगतो घंटकादनु ॥ तत्र सारस्वतं कुण्डं सरस्वत्योपपादितम् ॥ ९४ ॥ न्त्रगुस्तत्र सु
तैः सार्द्धं शारङ्गमर्कादिभिः प्रजग्मुः ॥ तत्र तत्र मुनीन्द्राणां पदेषु मुनिसत्तम ॥ ९५ ॥ शिलाशाद
१८ क्षिणे हस्ते गृध्रकूटो गिरिर्हितः ॥ गृध्ररूपेण संसिद्धास्तपस्तप्त्वा महर्षयः ॥ ९६ ॥ दृष्ट्वा गृध्रे २१८
श्वरं नत्वा याति शंभोः पदं नरः ॥ तत्र गृध्रगुहायां च पिण्डदः शिवलोकभाक् ॥ ९७ ॥ तत्र
गृध्रवटं नत्वा प्राप्तकामो दिवं व्रजेत् ॥ ऋणमोक्षं पापमोक्षं शिवं दृष्ट्वा शिवं व्रजेत् ॥
९८ ॥ मूलक्षेत्रं च तत्रास्ते पिण्डदः स्वर्गेसितृन्नरः ॥ आदिपालेन गिरिणा समाक्रांतं शि

ल्लोदरम् ॥ ६९ ॥ तत्रास्ते गजरूपेण विघ्नेशो विघ्ननाशनः ॥ तं दृष्ट्वा मुच्यते विघ्नैः पितॄन्ब्र
ह्मपुरं नयेत् ॥ ७० ॥ ❀ ॥ ❀ ॥ ❀ ॥ इति श्रीवायुपुराणे श्वेतवाराहकल्पे गयामाहात्म्ये च
तुर्थोध्यायः ॥ नारद उवाच ॥ कथमव्यक्तरूपेण स्थितस्त्वादिगदाधरः ॥ कथं व्यक्तस्व
रूपेण व्यक्ताव्यक्तात्मना स्थितः ॥ १ ॥ कथं गदा समुत्पन्ना यया क्रीतो गयासुरः ॥ गदालो
लः कथं चासीत्सर्वपापक्षयंकरः ॥ २ ॥ ❀ ॥ सनत्कुमार उवाच ❀ ॥ गदो नामासुरो ह्यासीद्वृ
ज्राद्वज्रतरो दृढः ॥ प्रार्थितो ब्रह्मणो प्रादात्तस्य शरीरास्थि दुस्त्यजेत् ॥ ३ ॥ ब्रह्मोक्तो विश्वकर्मा
पि गदां चक्रेऽद्भुतां तदा ॥ तदस्थ्ना वज्रनिःपेषैः कुंदैः स्वर्गे ह्यधारयत् ॥ ४ ॥ अथ कालेन किय

पदे परे ॥२८॥ रवेश्च कार्त्तिकेयस्य क्रौंचमातंगयोरपि ॥ गणेशस्य चन्द्रमसो दधीचेश्च
पदं तथा ॥२९॥ मुखलिंगानि सर्वाणि व्यक्ताव्यक्तात्मना स्थिताः ॥ आद्यो गदाधरो देवो
व्यक्तः श्रीमान् गदाधरः ॥३०॥ गायत्री चैव सावित्री त्रिसंध्या च सरस्वती ॥ गयादित्य
२१ श्चोत्तरार्को दक्षिणार्कोपि नैमिषः ॥३१॥ श्वेतार्को गणनाथश्च वसवोष्टौ मुनीश्वराः ॥ २१
रुद्राश्चैकादशैवाथ तथा सप्तर्षयः परे ॥३२॥ सोमनाथश्च सिद्धेशः कपर्दीशो विनायकः ॥
नारायणो महालक्ष्मीर्ब्रह्मा श्रीपुरुषोत्तमः ॥३३॥ मार्कण्डेयेश कोटीशावंगारेशः पि
तामहः ॥ जनार्दनो मंगला च पुण्डरीकाक्ष उत्तमः ॥३४॥ इत्यादिव्यक्तरूपेण स्थितस्त्वा

दिगदाधरः ॥ हेतिर्य्यो राक्षसस्तत्र हतो विष्णुपुरं ययौ ॥ २५ ॥ ब्रह्मणा सह रुद्राद्यैः कारिते
निश्चले स्मृते ॥ तुष्टाव आद्यं गदापाणिं वेधा हर्षेण निर्वृतः ॥ २६ ॥ ✿ ॥ ब्रह्मोवाच ॥ ✿ ॥
गदाधरं व्यपगतकालकल्मषं गयागतं गदितगुणं गुणातिगम् ॥ गुहागतं गिरिवरगौ
रगेहगं गणार्च्चितं वरदमहं नमामि तम् ॥ २७ ॥ ब्रह्मश्रियं त्रिदशगणादिसुश्रियं च ब्र
श्रियं दितिजव्रदाहणाश्रियम् ॥ कलिश्रियं कलिमलमर्द्दनश्रियं गदाधरं नौमि त
माश्रितश्रियम् ॥ २८ ॥ दृढं दृढं परिदृढगाढसंस्तुतं कामाद्भुतं सुदृढमहर्द्धिहर्द्धिग
म ॥ तमाढ्यगं दृढदुरितान्धढौकितं स्वढौकितं दृढतरगोत्रसूक्तिकिंचिनः ॥ २९ ॥

विदेहकं करणकलाविवर्ज्जितं विजन्मकं दिनकरवेदिचूषितम् ॥ गदाधरं ध्वनिमुख
वर्ज्जितं परं नमाम्यहं सततमनादिमीश्वरम् ॥ २० ॥ मनोतिगं मतिगतिवर्ज्जितं परं सदा
हृदये श्रुतिशिरःसंस्तुतं बुधैः ॥ चिदात्मकं कलिगतिकारणातिगं गदाधरं हृदयगतं नमामि त
२२ म् ॥ २१ ॥ ॐ ॥ सनत्कुमार उवाच ॥ ॐ ॥ देवैः सार्द्धं ब्रह्मरौद्रैः स्तुतश्चादिगदाधरः ॥ ऊचे वरान्वृ २२
णीध्वत्वं वरं ब्रह्मातमब्रवीत् ॥ २२ ॥ शिलायां देवरूपिण्यां नतिष्ठामस्त्वया विना ॥ स्थास्या
मो वै त्वया सार्द्धं नित्यं व्यक्तादिरूपिणा ॥ २३ ॥ एवमस्त्विति या सार्द्धं स्थितश्चादिगदाधरः ॥
लोकानां रक्षणार्थाय जगतां मुक्तिहेतवे ॥ २४ ॥ सुव्यक्तः पुण्डरीकाक्षो जनार्द्दन इति

श्रुतः॥ वेदैरगम्या या मूर्त्तिरादिन्तूना सनातनी॥३५॥ सुव्यक्ता श्वेतकल्पे तु भविष्यति न
संशयः॥ वराहकल्पे ह्यव्यक्ताव्यक्तिमप्यगमत्सुरा॥३६॥ संतारणाय लोकानां देवानां र
क्षणाय च॥ गयाशिरसि सुव्यक्तो भविष्यति न संशयः॥३७॥ ये द्रक्ष्यंति सदा भक्त्या देव
मादिगदाधरम्॥ कुष्ठरोगादिनिर्मुक्ता यास्यंति हरिमंदिरम्॥३८॥ ये द्रक्ष्यंति सदा भक्त्या दे
वमादिगदाधरम्॥ ते प्राप्स्यंति धनं धान्यमायुरारोग्यमेव च॥३९॥ कलत्रपुत्रपौत्रादिगुण
कीर्त्तिसुखानि च॥ श्रद्धया ये नमस्यंति राज्यं ब्रह्मपुरं तथा॥४०॥ भुक्त्वा व्रजेयुः सततं पुण्य
पुण्यपुंजफलं नराः॥ गंधदानेन गंधाढ्यः सौभाग्यं पुष्पदानतः॥४१॥ धूपदानेन राज्याग्नि

द्वीपाद्दीप्तिं नेविष्यति ॥ ध्वजदानात्पापहानिर्यात्राफलं द्विसत्लोकत्वात् ॥ ४२ ॥ श्राद्धपिण्ड
प्रदोयस्तु विष्णुं नेष्यति वै पितॄन् ॥ श्रद्धया येनमश्यंति स्तोत्रेणादिगदाधरम् ॥ ४३ ॥ स्तो
ष्यंति च समभ्यर्च्य पितॄन्नेष्यंति माधवम् ॥ शिवोऽपि परया प्रीत्या तुष्टावादिगदाधरम् ॥
२३ ॥ ४४ ॥ श्रीः ॥ शिव उवाच ॥ श्रीः ॥ अव्यक्तरूपो यो देवो मुण्डपृष्ठाद्रिरूपतः ॥ फल्गुतीर्थादिरूपे २३
णानमाम्यादिगदाधरम् ॥ ४५ ॥ व्यक्तरूपेण यो देवो जनार्दनस्वरूपतः ॥ मुण्डपृष्ठे स्वयं जा
तो नमामि ॥ ४६ ॥ व्यक्ताव्यक्तस्वरूपेणापदरूपेण संस्थितः ॥ मुखादिलिंगरूपेण नमामि ॥ ४७ ॥
शिलायां देवरूपिण्यां स्थितं ब्रह्मादिभिः सुरैः ॥ पूजितं च स्तुतं देवं नमामि ॥ ० ॥ ॥ ४८ ॥

यं च दृष्ट्वा ततः स्तुत्वा पूजयित्वा प्रणम्य च ॥ आद्यादौ ब्रह्मलोकाग्निर्न्नमा० ॥४९॥
महदादेस्त्वजगतोव्यक्तस्यैव हि कारणम् ॥ अव्यक्तं ज्ञानरूपं तं नमा० ॥५०॥ देहेन्द्रियमनो
बुद्धिप्राणाहंकार वर्ज्जितम् ॥ जाग्रत्स्वप्नविनिर्मुक्तं नमा० ॥५१॥ नित्यानित्यविनि
र्मुक्तं सत्यमानंदमव्ययम् ॥ तुरीयं ज्योतिरात्मानं नमा० ॥५२॥ सनत्कुमार उवाच ॥
एवं स्तुतो महेशेन प्रीतो ह्यादिगदाधरः ॥ स्थितो देवैः शिलायां स ब्रह्माद्यैर्द्दैवतैः स
ह ॥५३॥ संस्थितं मुण्डपृष्ठाद्रौ देवमादिगदाधरम् ॥ स्तुवंति पूजयंतीह ब्रह्मलोकं प्र
यांति ते ॥५४॥ धर्म्मार्थी प्राप्नुयाद्धर्म्ममर्थार्थी चार्थमाप्नुयात् ॥ कामान्वाप्नुयात्

कामीमोक्षार्थीमोक्षमाप्नुयात् ॥५५॥ वंध्याचलन्नतेपुत्रं वेदवेदांगपारगम् ॥ एजाविज
यमाप्नोति शूद्रस्सुखमाप्नुयात् ॥५६॥ ॥ ॥ ॥ इति श्रीवायुपुराणेश्वेतवाराह
कल्पेगयामाहात्म्ये पंचमोध्यायः ॥ सनत्कुमार उवाच ॥ गयायायात्रां प्रवक्ष्यामि शृणु ना
२४ रदमुक्तिदाम् ॥ निष्कृतिः पितृकर्तॄणां ब्रह्मलोकगीयते पुरा ॥१॥ उद्यतश्चेद्गयांगंतुं श्राद्धं
कृत्वा विधानतः ॥ विधाय कार्प्पटीवेषं कृत्वा ग्रामं प्रदक्षिणम् ॥२॥ ततोग्रामांतरं गत्वा २४
श्राद्धशेषस्य भोजनम् ॥ ततः प्रतिदिनं गच्छेत्प्रतिग्रहविवर्जितः ॥३॥ प्रतिग्रहाद
याद्वृत्तः संतुष्टो नियतः शुचिः ॥ अहंकारविमुक्तोयः सतीर्थफलमश्नुते ॥४॥ यस्य ह